ताण्डवतालिकः, पुं, (ताण्डवे शिवनृत्यकाले यस्तालः स कार्य्यतयास्त्यस्येति । ठन् ।) नन्दी । स शिवद्वारी । इति त्रिकाण्डशेषः ॥

ताण्डवप्रियः, पुं, (ताण्डवं उद्धतनृत्यं प्रियमस्य ।) शिवः । इति शब्दमाला ॥

ताण्डि, क्ली, (ताण्डेन मुनिना कृतम् । ताण्ड + बहुलवचनात् इञ् ।) नृत्यशास्त्रम् । इत्यमरटीकायां भरतः ॥

तातः, पुं, (तनोति विस्तारयति गोत्रादिकमिति । तन + "दुतनिभ्यां दीर्घश्च ।" उणां । ३ । ९० । इति क्तः दीर्घश्च । अनुदात्तेति नलोपः ।) पिता । इत्यमरः । २ । ६ । २८ । (यथा, रघुः । ९ । ७५ ।

"हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन् वेतसगूढ़ं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्त्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥")

अनुकम्प्यः । इति मेदिनी । ते, २१ ॥ (यथा, भागवते । १ । १४ । ३९ ।

"कच्चित्तेऽनामयं तात ! भ्रष्टतेजा विभासि मे ।
अलब्धमानोऽवज्ञातः किं वा तात ! चिरोषितः ॥")

पूज्ये, त्रि । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ७२ । वशिष्ठं प्रति दिलीपोक्तिः ।

"तस्मात् मुच्ये यथा तात ! संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥")

तातगुः, पुं, (तातस्य पितुरिव गौर्वाचकशब्दो यत्र । गवान्तत्वात् गौण्ये ह्रस्वः ।) क्षुद्रतातः । पितृव्यः । जनकस्य हिते, त्रि । इति मेदिनी । गे, ३६ ॥

तातजनयित्र्यौ, स्त्री, (तातश्च जनयित्री च ते ।) मातापितरौ । इत्यमरः ॥ द्विवचनान्तोऽयम् ॥

ताततुल्यः, त्रि, (तातस्य पितुस्तुल्यः ।) पितृसमः । तत्पर्य्यायः । मनोजवसः २ । इति हेमचन्द्रः । ३ । १५२ ॥ मनोजवः ३ पितृसन्निभः ४ इत्यमरः । तातलः ५ इति मेदिनी ॥

तातनः, पुं, (तातं मनोहरं यथा तथा नृत्यतीति । नृत् + बाहुलकात् डः ।) खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

तातलः, पुं, (तापं लातीति । ला + कः । पृषोदरादित्वात् पस्य तः ।) रोगः । पाकः । लौहकूटः । मनोजवः । इति मेदिनी । ले, ९८ ॥ तप्तमात्रे, त्रि । इत्यजयपालः ॥

तातिः, पुं, पुत्त्रः । इति जटाधरः ॥

तात्कालिकः, त्रि, (तत्काले भवः । तत्काल + "आपदादिपूर्व्वपदात्कालान्तात् ।" ४ । २ । ११६ । इत्यस्य वार्त्तिकोक्त्या ठञ् ।) तत्कालभवः । यथा, शुद्धितत्त्वे शङ्खः ।

"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा ।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥"

तात्पर्य्यं, क्ली, (तत्परस्य भावः । तत्पर + ष्यञ् ।) अभिप्रायः । इति शब्दार्थकल्पतरुः ॥ वक्तुरिच्छा । (यथा, भाषापरिच्छेदे । ८४ ।

"आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितम् ॥")

तादात्म्यं, क्ली, (तदात्मनो भावः । तदात्मन् + ष्यञ् ।) तत्स्वरूपम् । अभेदसम्बन्धः । इति न्यायशास्त्रम् ॥

तादृक्, [श्] त्रि, स इव दृश्यतेऽसौ । (तद् + दृश् + "त्यदादिषु दृशोऽनालोचने कञ्च ।" ३ । २ । ६० । इति क्विन् । "आ सर्व्वनाम्नः ।" ६ । ३ । ९१ । इति आत्वम् ।) तादृशः । ताहार मत इति भाषा ॥ इति मुग्धबोधम् ॥ (यथा, पञ्चतन्त्रे । १ । २७९ ।

"यादृशैः सेव्यते भृत्यैर्यादृशांश्चोपसेवते ।
कदाचिन्नात्र सन्देहस्तादृग् भवति पूरुषः ॥")

तादृक्षः, त्रि, (स इव दृश्यते इति । तद् + दृश् + त्यदादिष्वित्यत्र क्सोऽपि वाच्य इति क्सः ।) तादृक् । इति मुग्धबोधम् ॥ (यथा, राजतरङ्गिण्याम् । ४ । २४२ ।

"ततः प्रभृति तादृक्षयोग्यार्थप्राप्तिलालसः ।
परिहासपुरे चक्रे स्थिरां गुर्व्वीं सपर्व्विणीम् ॥")

तादृशः, त्रि, (स इव दृश्यते इति । तद् + दृश् + "त्यदादिष्विति ।" ३ । २ । ६० । इति कञ् ।) तादृक् । (यथा, पञ्चतन्त्रे । १।४३५ ।

"उपदेशो न दातव्यो यादृशे तादृशे जने ॥")

तानं, क्ली, (तन ड ञ विस्तारे + भावे घञ् ।) विस्तारः । ज्ञानविषयः । इति शब्दार्थकल्पतरुः ॥

तानः, पुं, (तन्यते गीतमनेनेति । तन + घञ् ।) गानाङ्गविशेषः । यथा, सङ्गीतदामोदरे ।

"विस्तार्य्यन्ते प्रयोगा यैर्मूर्च्छनाशेषसंश्रयाः ।
तानास्तेऽपूानपञ्चाशत् सप्तस्वरसमुद्भवाः ॥
तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक् ।
ते स्युः पञ्चसहस्राणि त्रयस्त्रिंशच्छतानि च ॥"

तानवं, क्ली, (तनोर्भावः । तनु + "इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गात्रे तनुता । यथा, उज्ज्वलनीलमणिः ।

"तानवत् तनुता गात्रे दौर्व्वल्यभ्रमणादिकृत् ॥"

(यथा, आर्य्यासप्तशत्याम् । ३९३ ।

"परपतिनिर्द्दयकुचटाशोषित शठ ! नेर्ष्यया न कोपेन ।
दग्धममतोपतप्ता रोदिमि तव तानवं वीक्ष्य ॥")

तानूरः, पुं, (तन् + बाहुलकात् ऊरण् ।) पयसां भ्रमः । आवर्त्तः । इति भूरिप्रयोगः ॥

तान्तः, त्रि, (तम + क्तः ।) श्रान्तः । इति शब्दार्थकल्पतरुः ॥ (यथा, प्रद्युम्नविजये । २ अङ्के ।

"पान्थं श्रान्तिनितान्ततान्तमतुलं सन्तोषयत्यान्त्यशन्
यत्रात्यन्तघनच्छदैर्विटपिभिश्छन्ने निरस्तातपे ॥")

तान्त्रिकः, त्रि, (तन्त्रं सिद्धान्तं अधीते वेद वा । तन्त्र + "उक्थादित्वात् ठक् ।) ज्ञातसिद्धान्तः । शास्त्रतत्त्वज्ञः । इत्यमरः । २।८।१५॥ तन्त्रशास्त्रवेत्ता तत्सम्बन्धी च ॥ (यथा, भागवते ।८।६।६ ।

"श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण ॥")

तापः, पुं. (तप + घञ् ।) सन्तापः । (यथा, भागवते । ३ । १४ । ४८ ।

"नैदाघजं तापमिवोडुराजः ॥")

कृच्छ्रम् । इति मेदिनी । पे, ७ ॥ (त्रिविध दुःखम् । यथा देवीभागवते । १ । १ । ७ ।

"दीर्घायुर्भव सर्व्वज्ञ ! तापत्रयविवर्ज्जितः ॥")

तापकः, पुं, (तापयतीति । तप + णिच् + ण्वुल् ।) ज्वरः । इति शब्दरत्नावली ॥ तापकर्त्तरि त्रि ॥

तापत्यः, पुं, (तपती सूर्य्यकन्या तस्या अपत्यं पुमान् । तपती + ण्यः ।) अर्ज्जुनः । इति पुराणम् ॥ (यथा, महाभारते । १।४६।२ ।

"तस्मात्तापत्य ! यत्किञ्चिन्नृणां श्रेय इहेप्सितम् ।
तस्मिन् कर्म्मणि योक्तव्या दान्तात्मानः पुरोहिताः ॥"

तपतीवंशोद्भवकौरवमात्रम् । यथा, तत्रैव । १ । १७१ । ६९ ।

"सोऽहं त्वयेह विजितः संख्ये तापत्यवर्द्धन ! ॥"

तपत्या उपाख्यानम् । तपती + ष्यञ् । तपत्युपाख्याने, क्ली । यथा, तत्रैव । १।२।१०९ ।

"तापत्यमथ वाशिष्ठमौर्व्वञ्चाख्यानमुत्तमम् ॥"

एतदुपाख्यानन्तु महाभारते आदिपर्व्वणि १७२ अध्याये द्रष्टव्यम् ॥)

तापनः, पुं, (तापयतीति । तप + णिच् + कर्त्तरि ल्युः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ९ ॥ (यथा, महाभारते । ५ । ४६ । २ ।

"शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते ।
तच्छुक्रं ज्योतिषां मध्ये तप्तं तपति तापनम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥")

कामबाणः । इति जटाधरः ॥ (यदुक्तं,—

"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥")

सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (क्ली, नरकविशेषः । यथा, याज्ञवल्क्ये । ३ । २२४ ।

"असिपत्रवनञ्चैव तापनञ्चैकविंशकम् ॥"

भावे ल्युट् । तापकरणम् । यथा, सुश्रुते ।१।४१ ।

"तद्दहनपचनदारणतापनप्रकाशनप्रभावर्णकरमिति ॥") तापयितरि, त्रि ॥ (यथा, महाभारते । १ । १९ । २१ ।

"ततोऽम्बराच्चिन्तितमात्रमागतं
महाप्रभं चक्रममित्रतापनम् ॥")

तापसं, क्ली, तमालपत्त्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तापसः, त्रि, (तपोऽस्त्यस्येति । तपस् + "अण् च ।" ५ । २ । १०३ । इति अण् । यद्वा, तपः शीलमस्य । "छत्रादिभ्यो णः ।" ४ । ४ । ६२ । इति णः ।) तपस्वी । इत्यमरः । २ ।७।४२॥ (यथा, मनुः । ६ । २७ ।

"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥"

तपःसम्बन्धी । यथा, गौः रामायणे । २।५२।५ ।

"तापसं व्रतमास्थिय ततो गुहसवाप्य ह ॥")

पुं, दमनकवृक्षः । बकपक्षी । इति राजनिर्घण्टः ॥ (इक्षुविशेषः । यथा, सुश्रुते । १ । ४५ ।